**अनुशोक** पु० अनु+शुच–घञ्। पश्चाच्छोके अनुशोचने।

**अनुशोचन** न० अनु+शुच–ल्युट्। अनुशोके। "इष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात्। श्लाघानुशोचनाभ्यां च भग्नतेजो विभिद्यते" इति शु०त० देवलः। अनुशोचनं धनव्ययेन पश्चात्ताप इति रघुनन्दनः। स्वार्थे णिचि युच्। अनुशोचना तत्रैवार्थे स्त्री।

**अनुशोचनीय** त्रि० अनुशुच्यते अनु+शुच–कर्म्मणि अनीयर्। अनुशोचनार्हे यमुद्दिश्य शोकः क्रियते तस्मिन्।

**अनुशो(शु)चित** न० अनु+शुच–भावे क्त उदुपधत्वात् वा न कित्त्वम्। अनुशोचने। अनुशोचितुमारब्धः आरम्भार्थे क्त वा गुणः। कृतशोचनारम्भे त्रि०।

**अनुश्लोक** न० अनुश्लोक्यते गीयते अनु+श्लोक–कर्म्मणि अच्। महाव्रते गेये सामभेदे, "श्लोकेन स्तुवते पुरस्तात् सदसः, अनुश्लोकेन पश्चादिति" ता०ब्रा०। तच्च वेगानग्रन्थे ११,२ प्रपा० आद्यम् साम। [नुषक्ता" इति सि०कौ०।

**अनुषक्त** त्रि० अनु+सन्ज–क्त। संलग्ने। "येऽत्र नकारा-

**अनुषङ्ग** पु० अनु+सन्ज–घञ्। दयायां दयया हि अन्यदुःखेनान्यदुःखसम्बन्धात्तथात्वम्। प्रसङ्गे, प्रसङ्गश्च अन्योद्देशेन प्रवृत्तस्य तन्नान्तरीयकविधयान्यसिद्धिः यथा "विप्रवधप्रायश्चित्तेन तन्नान्तरीयकविधया अवगोरदण्डनिपातनप्रायश्चित्तसिद्धिः। "क्वयं केचिदुपात्तस्य दुरितस्य प्रवदन्ते। अनुत्पत्तिं तथाचान्ये प्रत्यवायस्य मन्वते। नित्यक्रियां तथाचान्ये ह्यनुषङ्गफलां श्रुतिमिति" प्रा०त० आप०स्तू०। अनुषङ्गेण फलं यस्या इति तदर्थः। एकत्र वाक्ये श्रुतस्य शब्दस्यान्यत्र वाक्येऽन्वयार्थमाकर्षणे। यथा "नित्यक्रियां तथा चान्ये" इति वाक्ये पूर्ब्ववाक्योपात्तस्य मन्वते इति क्रियापदस्यान्वयार्थमाकर्षणम्। तथा पञ्चावयवन्यायवाक्येषु उपनयवाक्यस्थस्य अयमिति पदस्य निगमनवाक्येऽन्वयार्थमाकर्षणम्। यथा वह्निव्याप्यो धूमो धूमावांश्चायमिति उपनयवाक्यस्थस्य अयमिति शब्दस्य तस्माद्वह्निमानिति वाक्येऽन्वयेन अयं वह्निमानिति बोधः। अतएव शास्त्रकारैः पूर्ब्बत्र श्रुतशब्दस्योत्तरत्रानुकर्षणबोधनाय एतत्पदमनुषञ्जनीयमित्युक्तम्।

**अनुषङ्गिन्** त्रि० अनुक्षणं सजते अनु+सन्ज घिनुण्। अनुक्षणं प्रसक्ते। "सप्तकस्यास्य वर्गस्य सर्व्वत्रैवानुषङ्गिणः। पूर्ब्बं पूर्ब्बं गुरुतरं विद्याद्व्यसनमात्मन" इति मनुः। अनुषङ्गिणः प्रायेणावस्थितस्येति" कुल्लू०। व्यापके च। "विभुतानुषङ्गि भयमेति जन इति "किरा० विभुतायाः प्रभुत्वस्यानुषङ्गि व्यापकमिति" तट्टीकायां मल्लिनाथः।

**अनुषक्** अव्य० अनु+सन्ज–क्विप्। आनुपूर्ब्व्यां। स्वरादेराकृतिगणत्वादयं तद्गणीयः" इति मनो०। षु० दीर्घः। आनुषगप्यत्रार्थे अव्य०।

**अनुषिक्त** त्रि० अनु+सिच–क्त। सततसिक्ते पश्चात्सिक्ते च।

**अनुषेचन** न० अनु+सिच–भावे ल्युट्। अनुक्षणसेचने, पश्चात्सेचने च।

**अनुष्टुति** स्त्री अनु+स्तु–क्तिन्। अनुक्रमेण स्तुतौ "यः पूर्ब्ब्यमनुष्टुतिमीशे इति ऋ० ८,६८, अनुष्टुतिम् अनुक्रमेण क्रियमाणां स्तुतिमिति भाष्यम्।

**अनुष्टुब्गर्भा** स्त्री ६ब०। "आद्यः पञ्चाक्षरः" पादः उत्तरेऽष्टाक्षरास्त्रयः अनुष्टुब्गर्भैव सोष्णिक्सेत्युक्तलक्षणे छन्दोभेदे। "अद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा" इति का० सर्वा०

**अनुषण्ड** अव्य० षण्डः पद्मसमूहस्तत्र विभ० अव्ययी०। षण्डे इत्यर्थे। तत्र जातादि कच्छादि० अण्। आनुषण्डस्तज्जाते त्रि०।

**अनुष्टुभ्** स्त्री अनु+स्तुन्भ–क्विप् षत्वम्। सरस्वत्याम्, अष्टाक्षरपादके, छन्दोभेदे वाचि च। अनुष्टुप्छन्द इति य० १५,५, "अनु निरन्तरं स्तुभ्यतेऽनया अनुष्टुप् वाक्" वागेव संस्तुप् छन्दः "वागनुष्टुप्छन्द" इति श्रुतेरिति" वेददी०। "अनुष्टोभनादनुष्टुबिति"ब्राह्मणे निरुक्तिः। "गायत्र्युष्णिगनुष्टुप् चेति छन्द०। अनुष्टुप् च द्विविधा यथा कथञ्चिदष्टाक्षरपादिका जातिः, विशेषसन्निवेशयुक्ताक्षरकं छन्दश्च। तत्र जातेः २५६ भेदाः। "पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठञ्च पादानां शेषेष्वनियमो मत" इति छन्दोमञ्जर्य्युक्तलक्षणं द्वितीयम्। तस्य च पञ्चमलघुत्वं व्यभिचरति च "यियक्षमाणेनाहूत" इति माघः। तस्य च मात्राद्यवरूपत्वं यथा 'प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वक्तलक्षणम्। लोकेऽनुष्टुबिति ख्यातम् तस्याष्टाक्षरता कृतेति छन्दोम०। अतएव वृत्तरत्नाकरे "वक्त्रं नाद्यान्नसौ स्यामब्धेर्योऽनुष्टुभि ख्यातमिति" वक्त्रनामतोक्ता। वर्णवृत्तस्य तु वितानमिति नाम यथोक्तं वृत्तरत्नाकरे "वितानमाभ्यां यदन्यदिति।" आभ्यां समानिकाप्रमाणिकाभ्यामन्यत् सर्वमित्यर्थः। "अथ छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुबित्याद्युपक्रम्य चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि, ऊनाधिकेनैकेन निचृद्भूरिजौ, द्वाभ्यां विराट्स्वराजौ, पादपूरणार्थं तु क्षिप्रसंयोगैकाक्षरीभावात् व्यूहेदिति "अनादेशेऽष्टाक्षराः पादास्त्रत्पदाश्चर्च्च इति